**अञ्जस्** न० अनक्ति गच्छति मिश्रयति वाऽनेन अन्जु-गतौ मिश्रणे च असुन् । वेगे, बले, औचित्ये च । "अञ्जस उपसंख्यानमिति" वार्त्तिकात् तृतीयायाः अलुक् । अञ्जसा-कृतम् । "अञ्जः समुद्रमपजग्मुराप" इति वेदः ।

**अञ्जस** त्रि० अन्ज-असच् । सरले अवक्रे ।

**अञ्जसा** अव्य० अन्ज-भावे अच् अञ्जं गतिं विलम्बं वा स्यति सो-बा०का । विलम्बाक्षमे, शैघ्र्ये, याथार्थ्ये च । "रसोऽ-ञ्जसा शासता रज" इति वेदः ।

**अञ्जि** पु० अज्यतेऽनेन अन्ज-करणे इन् । तिलकादौ चिह्ने "अग्नयेऽनीकवते रोहिताञ्जिरनड्वानिति" य० रोहितो रक्तोऽञ्जिस्तिलकोऽस्येति वेददीपः । "तस्मै दन्ताञ्जये इति" भवदेवे वेदमन्त्रः । [(ष्णु)च् । सूर्य्ये ।

**अञ्जिष्ठ(ष्णु)** पु० अनक्ति स्वभाभिर्विश्वम् । अन्ज-इष्ठ-

**अञ्जी** स्त्री० अञ्जि+वा ङीप् । पेषणयन्त्रे, मङ्गले च ।

**अञ्जीर** पु० अन्ज-बा० ईरन् (पेयारा) इति ख्याते वृक्षे ।

**अट** गतौ भ्वादि० सक० पर० सेट् । अटति आटीत् । "भो बटो भिक्षामटेति" सि०कौ । परि+परितो भ्रमणे पर्य्यटन् ।

**अट** गतौ इदित् भ्वा०आत्म०सक०सेट् । अण्टते आण्टिष्ट ।

**अटनि(नी)** स्त्री अटति मौर्व्वीम् अट-अनि वा ङीप् । धनुरग्रे गुणारोपणस्थाने ।

**अटरु(रू)ष** पु० अटति भ्रमति अट-अच् तं रोषति हिनस्ति रुष-क, अटैः अटद्भिर्वा रुष्यते न युज्यते रुष-क वा । (वासक) इति ख्याते वृक्षे ।

**अटवि(वी)** स्त्री अटन्ति चरमे वयसि यत्र अट-अवि वा ङीप् । वने । विन्ध्याटवीति का० विन्ध्यगिरिसन्निकृष्ट प्रसिद्धवनम् । "कान्तारप्रदेशेष्वटवीषु चेति" रामा० ।

**अटा** स्त्री अट-बा० अङ् । पर्य्यटने ।

**अटाट्या** स्त्री अट-यङ्-भावे अ स्त्रीत्वात् टाप् । परि-भ्रमणे, दृथागमने च । यङ्लुकि । अटाटाट्यत्र ।

**अट्ट** अतिक्रमे बधे च भ्वादि० आत्म० सक० सेट् । अट्टते । आट्टिष्ट । दोपधोऽयं तेन अट्टिटिषते आट्टिटत् । क्विपि अत् । टोपधस्य तु आटिट्टिषते अटिट्टत् क्विप् अट् ।

**अट्ट** अनादरे चुरादि० उभय० सक० सेट् । अट्टयति ते । आटिट्टत् ।

**अट्ट** पु० अट्टयति अनाद्रियतेऽन्यद्यत्र अट्ट-आधारे घञ् । प्रासादस्योपरिगृहे, प्राचीरोपरिस्थसैन्यगृहे, च यत्र स्थिता हि नरा अन्यान् हीनतया नाद्रियन्ते, यस्मिन् वसतस्य अन्योत्कर्षेऽनादरः । उच्चे भृशे च त्रि० अन्ने "अट्टशूला जनपदाः शिवशूलाश्चतुष्पथा" इति भार० "अट्टमन्नं शूलं विक्रेयं येषामिति" नीलकण्ठः शुष्के च न० । क्षौमवस्त्रे प्रासादे च पु० "सुधाधवलाट्टहासेति" काद० । "ददृशे नगरी लङ्का साट्टप्राकारतोरणेति" रामा० । गृहशब्दे प्रासादलक्षणादि वक्ष्यते ।

**अट्टट्ट** अव्य० अट्टोऽनादरः अट्टप्रकारः अट्टस्य गुणवाचितया प्रकारे द्वित्वम् शकन्ध्वादि० पररूपम् । अत्युच्चे, "अट्टट्ट हासमशिवं शिवदूती चकार हेति" चण्डी

**अट्टन** न० अट्ट्यतेऽनाद्रियते रिपुरनेन अट्ट-करणे ल्युट् । चक्राकारफलकास्त्रे । भावे ल्युट् । अनादरे न० ।

**अट्टस्थली** स्त्री अट्टप्रधाना स्थली शा०त० । प्रासादप्रधाने देशभेदे धूमा० वुञ् । आट्टस्थलकः तद्देशभवे त्रि० ।

**अट्टहास** पु० अट्टेनातिशयेन हासः हस-घञ् ३त० । उच्चहासे ।

**अट्टहासक** पु० अट्टहास इव कायति कै-क । कुन्दवृक्षे तस्य शुभ्रपुष्पत्वात् उच्चहासतुल्यत्वम् । [उच्चहासिनि त्रि० ।

**अट्टहासिन्** पु० अट्टमुच्चैर्हसति हस-णिनि । शिवे ।

**अट्टाट्ट** पु० अट्टट्टवत् न पररूपम् । अत्युच्चे सर्व्वोत्कर्षे अना-दराधिक्ये ।

**अट्टालक** पु० अट्ट इव प्रासादगृहमिव अलति पर्य्याप्तो भवति अल-अच् । प्रासादोपरिस्थे गृहे । स्वार्थे कन् । तत्रार्थे 'गोपुराट्टालकवतीं हर्म्यप्राकारशोभनामिति" रा० ।

**अट्टालिका** स्त्री अट्टाल+स्वार्थे कन् । इष्टकादिनिर्मिते राजगृहे ।

**अट्टालिकाकार** पु० अट्टालिकां करोति रचयति कृ-अण् उप० । (राज) प्रासादकारके "कुलटायां च शूद्रायां चित्रकारस्य वीर्य्यतः । भवेदट्टालिकाकारः पतितो जारदोषत" इत्युक्ते सङ्कीर्णजातिभेदे ।

**अठ** गतौ भ्वादि० पर० सक० सेट् । अठति । आठीत् ।

**अठ** गतौ इदित् आ० भ्वादि० सक० सेट् । अण्ठते । आण्ठिष्ट ।

**अड** उद्यमे भ्वादि० पर० सक० सेट् । अडति आडीत् ।

**अड** व्याप्तौ स्वादि० पर० अक०सेट् । वेद एवास्य प्रयोगः । अड्णोति । आडीत् ।

**अड्ड** अभियोगे, समाधाने च भ्वादि०पर०सक०सेट् । अड्डति । आड्डीत् । दोधपधोऽयम् अड्डिडिषति आड्डिडत् । क्विप् अत् । डोपधस्य तु आडिड्डिषति आडिड्डत् अट्